# Ardhanarishvara Stuti

# અર્ધનારીશ્વરસ્તુતિઃ

## Document Information

Text title : Ardhanarishvara Stuti

File name : ardhanArIshvarastutiH.itx

Category : shiva, devii, stuti, devI

Location : doc_shiva

Proofread by : Aruna Narayanan

Latest update : December 25, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2023

*sanskritdocuments.org*

Ardhanarishvara Stuti

# અર્ધનારીશ્વરસ્તુતિઃ

॥ શ્રીઃ ॥

વન્દેમહ્યમલમયૂખમૌલિરત્નં
દેવસ્ય પ્રકટિતસર્વમઙ્ગલાખ્યમ્ ।
અન્યોન્યં સદૃશમહીનકઙ્કણાઙ્કં
દેહાર્ધદ્વિતયમુમાર્ધરુદ્ધમૂર્તેઃ ॥ ૧॥

તદ્વન્દે ગિરિપતિપુત્રિકાર્ધમિશ્રં
શ્રીકણ્ઠં વપુરપુનર્ભવાય યત્ર ।
વક્ત્રેન્દોર્ઘટયતિ ખણ્ડિતસ્ય દેવ્યા
સાધર્મ્યં મુકુટગતો મૃગાઙ્કખણ્ડઃ ॥ ૨॥

એકત્ર સ્ફટિકશિલામલં યદર્ધે
પ્રત્યગ્રદ્રુતકનકોજ્જ્વલં પરત્ર ।
બાલાર્કદ્યુતિભરપિઞ્જરૈકભાગ-
પ્રાલેયક્ષિતિધરશૃઙ્ગભઙ્ગિમેતિ ॥ ૩॥

યત્રૈકં ચકિતકુરઙ્ગભઙ્ગિ ચક્ષુઃ
પ્રોન્મીલત્કુચકલશોપશોભિ વક્ષઃ ।
મધ્યં ચ કૃશિમસમેતમુત્તમાઙ્ગં
ભૃઙ્ગાલીરુચિકચસઞ્ચયાઞ્ચિતં ચ ॥ ૪॥

સ્રાભોગં ઘનનિબિડં નિતમ્બબિમ્બં
પાદોઽપિ સ્ફુટમણિનૂપુરાભિરામઃ ।
આલોક્ય ક્ષણમિતિ નન્દિનોઽપ્યકસ્મા-
દાશ્ચર્યં પરમુદભૂદભૂતપૂર્વમ્ ॥ ૫॥

યત્રાર્ધં ઘટયતિ ભૂરિભૂતિશુભ્રં
ચન્દ્રાંશુચ્છુરિતકુબેરશૈલશોભામ્ ।

અર્ધં ચ પ્રણિહિતકુઙ્કુમાઙ્ગરાગં
પર્યસ્તારુણરુચિકાઞ્ચનાદ્રિમુદ્રામ્ ॥ ૬॥

યત્કાન્તિં દધદપિ કાઞ્ચનાભિરામાં
પ્રોન્મીલદ્ભુજગશુભાઙ્ગદોપગૂઢમ્ ।
બિભ્રાણં મુકુટમુપોઢચારુચન્દ્રં
સન્ધત્તે સપદિ પરસ્પરોપમાનમ્ ॥ ૭॥

આશ્ચર્યં તવ દયિતે હિતં વિધાતું
પ્રાગલ્ભ્યં કિમપિ ભવોપતાપભાજામ્ ।
અન્યોન્યં ગતમિતિ વાક્યમેકવક્ત્ર-
પ્રોદ્ભિન્નં ઘટયતિ યત્ર સામરસ્યમ્ ॥ ૮॥

પ્રત્યઙ્ગં ઘનપરિરમ્ભતઃ પ્રકમ્પં
વામાર્ધં ભુજગભયાદિવૈતિ યત્ર ।
યત્રાપિ સ્ફુટપુલકં ચકાસ્તિ શીત-
સ્વઃસિન્ધુસ્નપિતતયેવ દક્ષિણાર્ધમ્ ॥ ૯॥

એકત્ર સ્ફુરતિ ભુજઙ્ગભોગભઙ્ગિ-
ર્નીલેન્દીવરદલમાલિકા પરત્ર ।
એકત્ર પ્રથયતિ ભાસ્મનોઽઙ્ગરાગઃ
શુભ્રત્વં મલયજરઞ્જનં પરત્ર ॥ ૧૦॥

એકત્રાર્પયતિ વિષં ગલસ્ય કાર્ષ્ણ્યં
કસ્તૂરીકૃતમપિ પુણ્ડ્રકં પરત્ર ।
એકત્ર દ્યુતિરમલાસ્થિમાલિકાના-
મન્યત્ર પ્રસરતિ મૌક્તિકાવલીનામ્ ॥ ૧૧॥

એકત્ર સ્રુતરુધિરા કરીન્દ્રકૃત્તિઃ
કૌસુમ્ભં વસનમનશ્વરં પરત્ર ।
ઇત્યાદીન્યપિ હિ પરસ્પરં વિરુદ્ધા-
ન્યેકત્વં દધતિ વિચિત્રધામ્નિ યત્ર ॥ ૧૨॥

દન્તાનાં સિતિમનિ કજ્જલપ્રયુક્તે
માલિન્યેઽપ્યલિકવિલોચનસ્ય યત્ર ।
રક્તત્વે કરચરણાધરસ્ય ચાન્યો
નાન્યોન્યં સમજનિ નૂતનો વિશેષઃ ॥ ૧૩॥

કણ્ઠસ્ય ભ્રમરનિભા વિભાર્ધભાગં
મુક્ત્વા કિં સ્થિતિમકરોચ્છિરોરુહાર્ધે ।
અર્ધં વા કનકસદૃગ્રુચિઃ કચાનાં
સન્ત્યજ્ય ન્યવિશત કિં ગલૈકદેશે ॥ ૧૪॥

સૌવર્ણઃ કરકમલે યથૈવ વામે
સવ્યેઽપિ ધ્રુવમભવત્તથૈવ કુમ્ભઃ ।
ક્રીડૈકપ્રસૃતમતિર્વિભુર્બિભર્તિ
સ્વાચ્છન્દ્યાદુરસિ તમેવ નૂનમેનમ્ ॥ ૧૫॥

યત્રાસીજ્જગદખિલં યુગાવસાને
પૂર્ણત્વં યદુચિતમત્ર મધ્યભાગે ।
સંરમ્ભાદ્ગલિતમદસ્તદેવ નૂનં
વિશ્રાન્તં ઘનકઠિને નિતમ્બબિમ્બે ॥ ૧૬॥

ઇત્યાદીન્પ્રવિદધુરેવ યત્ર તાવ-
ત્સઙ્કલ્પાન્પ્રથમસમાગમે ગણેન્દ્રાઃ ।
યાવત્સ પ્રણતિવિધૌ પદારવિન્દં
ભૃઙ્ગીશઃ પરિહરતિ સ્મ નામ્બિકાયાઃ ॥ ૧૭॥

કિમયં શિવઃ કિમુ શિવાથ શિવા-
વિતિ યત્ર વન્દનવિધૌ ભવતિ ।
અવિભાવ્યમેવ વચનં વિદુષા-
મવિભાવ્યમેવ વચનં વિદુષામ્ ॥ ૧૮॥

એકઃ સ્તનઃ સમુચિતોન્નતિરેકમક્ષિ
લક્ષ્યાઞ્જનં તનુરપિ ક્રશિમાન્વિતેતિ ।
લિઙ્ગૈસ્ત્રિભિર્વ્યવસિતે સવિભક્તિકેઽપિ
યત્રાવ્યયત્વમવિખણ્ડિતમેવ ભાતિ ॥ ૧૯॥

યત્ર ધ્રુવં હૃદય એવ યદૈક્યમાસી-
દ્વાક્કાયયોરપિ પુનઃ પતિતં તદેવ ।
યસ્માત્સતાં હૃદિ યદેવ તદેવ વાચિ
યચ્ચૈવ વાચિ કરણેઽપ્યુચિતં તદેવ ॥ ૨૦॥

કાન્તે શિવે ત્વયિ વિરૂઢમિદં મનશ્ચ

મૂર્તિશ્ચ મે હૃદયસમ્મદદાયિનીતિ ।
અન્યોન્યમભ્યભિહિતં વિતનોતિ યત્ર
સાધારણસ્મિતમનોરમતાં મુખસ્ય ॥ ૨૧॥

ઉદ્યન્નિરુત્તરપરસ્પરસામરસ્ય-
સમ્ભાવનવ્યસનિનોરનવદ્યહૃદ્યમ્ ।
અદ્વૈતમુત્તમચમત્કૃતિસાધનં ત-
દ્યુષ્માકમસ્તુ શિવયોઃ શિવયોજનાય ॥ ૨૨॥

લક્ષ્યાણ્યલક્ષ્યાણ્યપરત્ર યત્ર
વિલક્ષણાન્યેવ હિ લક્ષણાનિ
સાહિત્યમત્યદ્ભુતમીશયોસ્ત-
ન્ન કસ્ય રોમાઞ્ચમુદઞ્ચયેત ॥ ૨૩॥

જૂટાહેર્મુકુટેન્દ્રનીલરુચિભિઃ શ્યામં દધત્યૂર્ધ્વગં
ભાગં વહ્નિશિખાપિશઙ્ગમધરં મધ્યે સુધાચ્છચ્છવિઃ ।
ધત્તે શક્રધનુઃશ્રિયં પ્રતિમિતા યત્રેન્દુલેખાનૃજુ-
ર્યુષ્માકં સ પયોધરો ભગવતો હર્ષામૃતં વર્ષતુ ॥ ૨૪॥

ઇત્યર્ધનારીશ્વરસ્તુતિઃ સમ્પૂર્ણા ॥

Proofread by Aruna Narayanan

*Ardhanarishvara Stuti*

pdf was typeset on December 25, 2023

Please send corrections to *sanskrit@cheerful.com*